Total No. of Questions :9 ] [ Total No. of Printed Pages : 1

Code No. : MN-05

# स्नातकपरीक्षाः—२०१२

## बि.ए. – विद्धन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—व्याकरणशास्त्रम्

### भागः - २, पत्रिका - १

### विषयः - परिभाषेन्दुशेखरः

दिनाङ्कः - 16-03-2012 ] [गरिष्ठाङ्काः - १००

समयः- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

—अ—

**सूचना—यथारुचि पञ्चैव प्रश्नाः समाधेयाः** 12 x 5=60

I. 'कार्यकालं सञ्ज्ञापरिभाषम्' इति परिभाषां व्याख्याय तत्पक्षे सञ्ज्ञाशास्त्रस्य न पृथग्वाक्यार्थबोध इत्यस्याशयं विवृणुत ।

II. 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति परिभाषां सावतरणं व्याख्याय विशिष्टरूपोपादने एव तत्प्रवृत्तिरिति कुतः ? विवृणुत ।

III. 'व्यपदेशिवदेकस्मिन्' इति परिभाषायाः 'एकस्मिन्' इति पदस्याशयं वर्णयित्वा मुख्यव्यवहारातिदेशस्य प्रयोजनं वर्णयत ।

IV. 'एकदेशविकृतमनन्यवत्' इति परिभाषाया आश्रयणे किं बीजम् ? सादृश्यनिषेधस्य किं तात्पर्यम् ?

V. 'यदामगपरिभाषाश्रयणे कारणमुपन्यस्य स्थानिवद्भावेन गतार्थतामाशङ्क्य परिहरत ।

VI. 'प्रत्ययग्रहणे चापञ्चम्याः' इतीमां परिभाषां व्याख्याय 'अपञ्चम्याः' इति निषेधस्याशयं ब्रूत ।

VII. 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति परिभाषायां 'सुदृषत्प्रसाद' इत्यत्रसन्तस्येति न दीर्घ इत्युक्तम् । तस्याशयः कः ?

—आ—

VIII **अवतरणिकाद्वयं साशयसमाधानं विवृणुत** 10 x 2=20

१. ननु देवदत्तश्चिकीर्षतीत्यत्र देवादेः सन्नन्तत्वप्रयुक्तद्वित्वाद्यापत्तिः ।

२. ननु 'अवतप्ते नकुलस्थितम्' इत्यत्र नकुलस्थितशब्दस्य कृदन्तत्वं न स्यात् ।

—इ—

IX **टिप्पणीः रचयत (चतुर्णामेव)** 05 x 4=20

१. स्थानिनो न निमित्तम् । २. अर्धाधिकविकारः । ३. आनुमानिकस्थान्यादेशभावः

४. शास्त्रार्थस्तेषु कर्तव्यः । ५. व्याख्यानतो विशेषप्रतिपत्तिः ।

—०—

Total No. of Questions :3 ]

[ Total No. of Printed Pages : 1

Code No. : **MN-06**

# स्नातकपरीक्षाः—२०१२

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—व्याकरणशास्त्रम्

भागः - २, पत्रिका - २

विषयः - प्रौढमनोरमा—१

दिनाङ्कः - 19-03-2012 ]

[गरिष्ठाङ्काः - १००

समयः- 10.00 A.M. to 1.00 P.M. ]

[ Max. Marks : 100

---

**I. पञ्च प्रश्नान् व्याख्यात** 12 x 5=60

१. 'हयवरट्' इति सूत्रे हकारोपदेशस्य किं प्रयोजनम् ? व्याख्यात ।

२. 'उपदेश आद्योच्चारणम्' इत्यत्र उपदेशशब्दस्य भावघञन्तत्वं करणघञन्तत्वं वा इति प्रतिपादयत ।

३. पूर्वत्रासिद्धमित्यस्य स्वतन्त्रविधित्वे कार्यासिद्धत्वे च कति दूषणानि ? प्रदर्शयत ।

४. 'संयोगान्तस्य लोपः' इति सूत्रे अन्तग्रहणफलं व्याख्यात ।

५. 'अदसो मात्' इति सूत्रं ग्रन्थोक्तदिशा व्याख्यात ।

६. 'ईदूदेद् द्विवचनं प्रगृह्यम्' इति सूत्रे द्विवचनग्रहणप्रयोजनं व्याख्यात ।

७. 'भोभगो–' इति सूत्रे निपातानां भोस् भगोस् इत्यादीनां ग्रहणे प्रयोजनं निरूपयत ।

**II. ससन्दर्भं व्याख्यात (द्वे एव)** 10 x 2=20

१. ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित् ।

२. मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ।

३. प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढा लक्षणा ।

**III. टिप्पणी रचयत (द्वयोरेव)** 10 x 2=20

१. उपदेशः

२. परिभाषास्वरूपम् ।

३. अधिकारः ।

—०—

Total No. of Questions :8 ] [ Total No. of Printed Pages : 1

Code No. : MN-07

# स्नातकपरीक्षाः–२०१२

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–व्याकरणशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - महाभाष्यम्–१

दिनाङ्कः - 21-03-2012 ] [गरिष्ठाङ्काः - १००

समयः- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

**सूचना–अन्तिममनपहाय आहत्य सप्त प्रश्नाः समाधेयाः।**

I. व्याकरणाध्ययनस्य कानि मुख्यानि प्रयोजनानि ? व्याख्यात। 10

II. व्याकरणाध्ययनस्यानुषङ्गिकाणि प्रयोजनानि उक्त्वा तेषु 'चत्वारि' इत्येतत्प्रजोयनं व्याख्यात। 10

III. शब्दोपदेशः कर्तव्यः अथवा अपशब्दोपदेशः कर्तव्यः ? अथवा उभयोपदेशः ?विवृणुत। 10

IV. शब्दानां प्रतिपत्तौ उपायभूतः प्रतिपदपाठः कर्तव्यो न वा विशदयत। 10

V. वर्णानामर्थवत्तानर्थकत्वे साधयत। 10

VI. वर्णोपदेशप्रयोजनं यथाभाष्यं निरूपयत। 10

VII. अथ व्याकरणमित्यस्य कः पदार्थः इति भाष्याशयं सम्यक् प्रतिपादयत। 10

VIII. अ **ससन्दर्भं चतुर्णां व्याख्यानं कुरुत।** 20

१. तेऽसुराः। २. दुष्टः शब्दः। ३. अविद्वांसः।

४. सक्तुमिव। ५. सारस्वतीम्। ६. असन्देहः।

आ **पङ्क्तीर्व्याख्यात** (चतस्रः) 20

१. अथशब्दानुशासनम्। २. मङ्गलार्थम्।

३. यथा लौकिकवैदिकेषु। ४. आचारे नियमः।

५. शब्दे ल्युडर्थः। ६. इष्टबुद्ध्यर्थश्च।

—०—